10-08-2020

अनिवार्यपत्रम् । शास्त्री II

व्याकरणछात्रहेतवे रघुवंशम् । श्लोकव्याख्या ।

"नृपं तमावर्तमनोज्ञनाभिः सा व्यत्यगादन्यवधूर्भवित्री ।
महीधरं मार्गवशादुपेतं स्रोतोवहा सागरगामिनीव ॥"

सन्दर्भः → पूर्ववत् ।

प्रसङ्गः → अत्र महाकविकालिदासः सुषेणं राजानं प्रति इन्दुमत्याः रागहीनं भावं सविशेषं वर्णयति ।

अन्वयः → आवर्तमनोज्ञनाभिः अन्यवधूः भवित्री सा सागरगामिनी स्रोतोवहा मार्गवशात् उपेतं महीधरम् इव तं नृपं व्यत्यगात् ।

शब्दार्थः व्याकरणञ्च → आवर्तमनोज्ञनाभिः → आवर्तइव मनोज्ञा नाभिः यस्याः सा = जलभ्रममनोहरनाभिः । अन्यवधूः = अपरभार्या । भवित्री = भाविनी, सुन्दरी । सागरगामिनी = समुद्रगन्त्री । स्रोतोवहा → स्रोतोभिः वहति या सा = नदी । मार्गवशात् = पथिवशात् । मार्गस्य वशः, तस्मात् मार्गवशात् । सागरगामिनी → सागरं गच्छति या सा = समुद्रगन्त्री । उपेतं = प्राप्तम् । महीधरम् = पर्वतम् । इव = यथा । तं नृपं = सुषेणं राजानम् । व्यत्यगात् = अतीत्य गता

तात्पर्य: → गंभीरनाभिः इन्दुमती अतीव सुन्दरी । सा अपरभार्या इव सुषेणं परित्यज्य अग्रे व्रजति यथा समुद्रगामिनी नदी मार्गे पर्वतं परित्यज्य पुरो प्रवहति ।

विशेष: → अस्मिन् श्लोके श्रृङ्गाररसः, वैदर्भीरीतिः, माधुर्यगुणः, उपमालङ्कारः, उपजातिवृत्तञ्च ।

10-08-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्य)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ

संस्कृतसामान्यम् । उपशास्त्री-II

अनिवार्यपत्रम् । कृत् प्रत्ययः ।

क्त्वा प्रत्ययः । ल्यप् प्रत्ययः ।

1. समानकर्तृकयोः पूर्वकाले → समानकर्तृकयोः धात्वर्थयोः पूर्वकाले विद्यमानात् धातोः क्त्वा स्यात् ।

यदि वाक्ये कर्ता एकः अस्ति किन्तु एकाधिकानां धातूनां प्रयोगाः भवन्ति तदा पूर्वकाले वर्तमानेषु सर्वेषु धातुषु क्त्वा प्रत्ययस्य प्रयोगः स्यात् । यथा→ बालकः भुक्त्वा पीत्वा विद्यालयं गच्छति अस्मिन् वाक्ये एकाधिकानि क्रियापदानि सन्ति । गमनक्रियापूर्वे बालकः भोजनं पानञ्च करोति अतएवात्र पूर्वकालिकक्रिययोः (भुक्त्वा, पीत्वा) क्त्वा प्रत्ययस्य प्रयोगः अभवत् ।

2. समासेऽनञ्पूर्वे क्त्वो ल्यप् → अव्ययपूर्वपदे ऽनञ् समासे क्त्वो ल्यबादेशः स्यात् ।

यथा→ प्र + √कृ + क्त्वा स्थाने ल्यप् = प्रकृत्य ।

√कृ + क्त्वा = कृत्वा ।

नञ् (अ) + √कृ + क्त्वा = अकृत्वा ।

समास होने पर धातुपूर्व अव्यय (उपसर्ग) नञ् भिन्न हो तब क्त्वा के स्थान पर ल्यप् प्रत्यय हो ।

| | धातु + क्त्वा = निष्पन्नरूपम् | उपसर्ग + धातु + ल्यप् = निष्पन्नरूपम् |
|---|---|---|
| | √भू + क्त्वा = भूत्वा | अनु + √भू + ल्यप् = अनुभूय |
| एवं प्रकारेण | पीत्वा, गत्वा, दृष्ट्वा, पक्त्वा, जित्वा, घ्रात्वा, नीत्वा, उषित्वा, उदित्वा ज्ञात्वा, दत्वा, हित्वा, हत्वा | सम्पीय, अवगत्य, संदृश्य, परिपच्य, विजित्य, आघ्राय, आनीय, अभ्युष्य अनूद्य, विज्ञाय, प्रदाय, आदाय, विहा आहत्य । |

10-08-2022

डॉ० निर्मलकुमार झा, (स० प्राचा

10-08-2020

संस्कृतसामान्यम् । उपशास्त्री I

अनिवार्यपत्रम् । हितोपदेशः । श्लोकव्याख्या ।

"दानं, भोगो, नाशस्तिस्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ॥"

सन्दर्भः → पूर्ववत् ।

प्रसङ्गः → पूर्ववत् ।

अन्वयः → वित्तस्य दानं, भोगः, नाशः (इति), तिस्रः गतयः भवन्ति ।
यो न ददाति न भुङ्क्ते (च), तस्य तृतीया गतिः भवति ।

शब्दार्थः व्याकरणञ्च → वित्तस्य = धनस्य (√विद् + लाभे क्त), वित्तम्
दानम् → √दा + ल्युट् = स्वीकरणम्, समर्पणम्, उपहारः, पुरस्कारः
भोगः → √भुज् + घञ् = सुखोपभोगः, आहारः, भोजनम् ।
नाशः → √नश् + घञ् = हानिः, ध्वंसः, भग्नाशः ।
तिस्रः → त्रि संख्याकाः स्त्रीलिङ्गे ।
गतयः → (गम् + क्तिन् = गतिः) = गमनम् ।
तृतीया → (तृतीय + टाप् ) त्रि संख्यात्मक पूरणार्थक संख्या स्त्रीलिङ्गे
भवति → √भू लट्, प्रथमपुरुषे एकवचने रूपम् = अस्ति ।

तात्पर्यः → मानवजीवने धनस्य त्रीणि उपयोगानि सन्ति। सर्वेषु जीवनेषु धनस्य महत्त्वं वर्तते। धनं दानाय, सुखोपभोगायच भवति। यो मनुष्यः दानं सुखोपभोगञ्च न करोति तस्य धनस्य नाशः अवश्यमेव भवति ।

10-08-2020

डॉ० निर्मलकुमार झा, (सं० प्राच
रा० उ० सं० महावि० सुखसेना, पूर्णिया